# Shri Matangi Stotram 5

# શ્રીમાતઙ્ગીસ્તોત્રમ્ ૫

## Document Information

Text title : Matangi Stotram 5

File name : mAtangIstotram5.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Manoj Sethuraman

Proofread by : Manoj Sethuraman

Description/comments : See also navaratnamAlA shyAmalAnavaratnamAlikAstotram

Latest update : August 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2024

*sanskritdocuments.org*

# શ્રીમાતઙ્ગીસ્તોત્રમ્ ૫

ૐકારપઞ્જરશુકીમુપનિષદુદ્યાન કેલિકલ કણ્ઠીમ્ ।
આગમવિપિનમયૂરીમાર્યામન્તર્વિભાવયે ગૌરીમ્ ॥ ૧॥

દયમાન દીર્ઘનયનાં દેશિકરૂપેણ દર્શિતાભ્યુદયામ્ ।
વામકુચનિહિતવીણાં વરદાં સઙ્ગીતમાતૃકાં વન્દે ॥ ૨॥

શ્યામાલિમસૌકુમાર્યામાનન્દાનન્દ સમ્પદુન્મેષામ્ ।
તરુણિમ કરુણાપૂરાં મદજલકલ્લોલ લોચનાં વન્દે ॥ ૩॥

સરિગમપધનિ સતાં તાં વીણા સઙ્ક્રાન્ત કાન્તહસ્તાન્તામ્ ।
ક્ષાં તાં મૃદુલસ્વાન્તાં કુચભરિતાન્તાં નમામિશિવકાન્તામ્ ॥ ૪॥

અવરતરઘટિત ચૂલીપાલી તાલી પલાસ તાટઙ્કામ્ ।
વીણાવાદનવેલા, કમ્પતિશિરસં નમામિ માતઙ્ગીમ્ ॥ ૫॥

માતઙ્ગીં નૌમિ સિદ્ધમાતઙ્ગીં યૌવનવન-
સારઙ્ગીં સઙ્ગીતામ્ભોરુહાનુભવભૃઙ્ગીમ્ ॥ ૬॥

મેચકમાસે ચનકં મિષ્ટમાદૃષ્ટાન્ત મધ્યભાગાન્તામ્ ।
યઃ પઠતિ લિખતિ વૈનાં સભવેદ્ભવેશ્વરઃ સાક્ષાત્ ॥ ૭॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યપ્રણીતં માતઙ્ગીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Most of these verses are in નવરત્નમાલા
અથવા શ્યામલાનવરત્નમાલિકાસ્તોત્રમ્.
Some attribute to Kalidasa and some to
Shankaracharya. Reader is advised
to pay attention to the text and the
devotion invoked.

Encoded and proofread by Manoj Sethuraman

*Shri Matangi Stotram 5*

pdf was typeset on August 19, 2024

Please send corrections to *sanskrit@cheerful.com*